**आमगन्धि** त्रि० आमस्यापक्वस्य गन्धइव गन्धो यत्र इत् समा० । अपक्वमांसादितुल्यगन्धाढ्ये । क्लीवमित्येके ।

**आमज्वर** पु० आमोऽपक्वः ज्वरः । अपक्वज्वरे नवज्वरे "खेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति" माघः ।

**आमनस्य** न० अप्रशस्तं मनो यस्य तस्य भावः ष्यञ् । दुःखे ।

**आमन्त्र** पु० आमादजीर्णात् त्रायते स्वफलतैलेन मलनिस्सारणात् त्रै-क पृषो० । १एरण्डवृक्षे राजनि० आमण्ड इति वा पाठः । तत्फलतैलपाने हि अजीर्णं मलनिस्सारणात्त्रयात्वम् आ+मन्त्र-अच् । २आमन्त्रणशब्दार्थे च ।

**आमन्त्रण** न० आ+मन्त्र-ल्युट् । १अभिनन्दने, २संबोधने, ३कामचारानुज्ञारूपे क्रियाभेदेषु प्रवर्त्तनव्यापारे च । "विधिनिमन्त्रणामन्त्रणेत्यादि" पा० । अवश्यकर्त्तव्ये नियोगो निमन्त्रणं यथा श्राद्धादिभोजने । यस्याकरणे प्रत्यवायो नास्ति तादृशव्यापारे नियोजनमामन्त्रणम् यथा स्थलविशेषे शयनायामन्त्रणम् । नवपत्रिकाप्रवेशपूर्व्व दिवसे सायं विल्वतरोः संबोधनरूपे ४व्यापारे च युच् आमन्त्रणाप्यत्र स्त्री

**आमन्त्रित** त्रि० आ+मन्त्र-क्त । १अनावश्यके कर्म्मणि नियोजिते २व्याकरणपरिभाषितायां सम्बोधनार्थकप्रथमाविभक्तौ न० 'सामन्त्रितम्' पा० "सम्बोधने या प्रथमा सामन्त्रितसंज्ञा स्यात्" सि०कौ । "आमन्त्रितं पूर्व्वमविद्यमानवत्" "नामन्त्रिते समानाधिकरणे सामान्यवचनम्" पा० । ३ निमन्त्रिते त्रि० "प्रातरामन्त्रितान् विप्रान्" छन्दोग० ।

**आमन्त्र्य** अव्य० आ+मन्त्र-ल्यप् । १सम्बोध्येत्यर्थे । "आद्यमामन्त्र्य पूर्व्ववत्" छन्दोग० आ+मन्त्र-कर्म्मणि यत् । २संबोधनीये आवश्यककार्य्ये ३नियोज्ये च त्रि० ।

**आमन्द** पु० आमं रोगं द्यति दो-ड बा०मुम् । वासुदेवे ।

**आमन्दा** स्त्री आमन्दमीषन्नन्दं करोति आमन्द+णिच्-अच् । खट्वाभेदे ( नेआरेरखाट ) शब्दचि० ।

**आमन्द्र** पु० ईषन्मन्द्रः प्रा०स० । १ईषद्गम्भीरशब्दे "आमन्द्रमन्थध्वनिदत्ततालम्" भट्टिः । २तद्युक्ते त्रि० ।

**आमपाक** पु० आमस्य अजीर्णविशेषस्य पाकः । वैद्यकोक्ते शोफरोगाद्यङ्गे आमस्य पाकभेदे । तद्विरणमुक्तं सुश्रुते यथा "स यदा बाह्याभ्यन्तरैः क्रियाविशेषैर्न सम्भावितः प्रशमयितुं क्रियाविपर्य्ययाद्बहुत्वाद्वा दोषाणां, तदा पाकाभिमुखो भवति । तस्यामस्य पच्यमानस्य पक्वस्य च लक्षणमुच्यमानमवधारय । तत्र मन्दोष्मता त्वक्सवर्णता शीतशोफता स्थैर्य्यं मन्दवेगताल्पशोफता चामलक्षणमुद्दिष्टम् । सूचिभिरिव निस्तुद्यते, दश्यत इव पिपीलिकाभिः, ताभिश्च संसृप्यत इव, छिद्यत इव शस्त्रेण, भिद्यत इव शक्तिभिः, ताड्यत इव दण्डेन, पीड्यत इव पाणिना, घट्ट्यत इव चाङ्गुल्या, दह्यत इव पच्यत इव चाग्निक्षाराभ्यामोषचोषपरीदाहाश्च भवन्ति वृश्चिकविद्ध इव च स्थानासनशयनेषु न शान्तिमुपैति आध्मातवस्तिरिव । अतश्च शोफो भवति त्वग्वैवर्ण्यं शोफाभिवृद्धिर्ज्वरदाहपिपासा भक्तारुचिश्च पच्यमानलिङ्गम् । वेदनोपशान्तिः पाण्डुताल्पशोफता बलीप्रादुर्भावस्त्वक्परिपुटनं निम्नदर्शनमङ्गुल्यावपीडिते प्रत्युन्नमनं वस्ताविवोदकसञ्चरणं पूयस्य प्रपीडयत्येकमन्तमन्ते चावपीडिते मुहुर्मुहुस्तोदः कण्डूरुन्नतता च व्याधेरुपद्रवशान्तिर्भक्ताभिकाङ्क्षा च पक्वलिङ्गम् । कफजेषु तु रोगेषु गम्भीरगतित्वादभिघातजेषु वा केषुचिदसमस्तं पक्वलक्षणं दृष्ट्वा पक्वमपक्वमिति मन्यमानो भिषङ्मोहमुपैति यत्र हि त्वक्सवर्णता शीतशोफता स्थौल्यमल्परुजताश्मवद्घनता न तत्र मोहमुपेयादिति । भवन्ति चात्र । आमं विपच्यमानञ्च सम्यक् पक्वञ्च यो भिषक् । जानीयात् स भवेद्वैद्यः शेषास्तस्करवृत्तयः । वातादृते नास्ति रुजा, न पाकः पित्तादृते, नास्ति कफाच्च पूयः, । तस्मात्समस्ताः परिपाककाले पचन्ति शोफांस्त्रय एव दोषाः" ।

**आमपात्र** न० कर्म्म० । अपक्वे पात्रे (काँचा) मृण्मयपात्रे "विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि" मनुः ।

**आमय** पु० आमं रोगं यात्यनेन या-करणे घञर्थे क आ+मीञ् हिंसायां करणे अच् वा । रोगे आमशब्दे तन्निरुक्तिर्दृश्या "आमयस्तु रतिरागसम्भवः" रघुः "तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून्" सुश्रुतः । अनामयः निरामयः । "समौ हि शिष्टैराम्नातौ वत्स्यन्तावामयः स च" माघः ।

**आमयाविन्** आमयोऽस्त्यस्य विनि दीर्घश्च । रोगयुक्ते । "क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च" "अग्निहर्त्ताऽऽमयावित्वम्" इति च मनुः । [आमशब्दे विवृतिः ।

**आमरक्त** न० आममपक्वं रक्तम् । रोगभेदे रक्तातिसारे

**आमरणान्तिक** त्रि० आमरणान्तं मरणरूपसीमापर्य्यन्तं व्याप्नोति ठञ् । मरणकालपर्य्यन्तव्यापके "अन्योन्यस्याव्यभिचारो भवेदामरणान्तिकः" मनुः ।

**आमर्द** पु० आ+मृद-घञ् । बलात् निष्पीडने । "आमर्दकाले राजेन्द्र ! व्यपसर्पेस्ततः परम्" भा०आश्र०प०१अ० । 'अर्द्धपीतस्तनं मातुरामर्द्दक्लिष्टकेशरम्' शकु० भावे ल्युट् । आमर्द्दनमप्यत्र न० ।